संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्पम्

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. ए.एस्. आरावमुदन्

सह-सम्पादकः
डॉ. विजयगुप्ता

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-110016

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्प

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. ए.एस्. आरावमुदन्**
पीठप्रमुखः, दर्शनशास्त्रपीठम्

सह-सम्पादकः
**डॉ. विजयगुप्ता**
सहायकाचार्यः, सर्वदर्शनविभागः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
नई दिल्ली-110016

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

© प्रकाशकाधीन

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-6-5

मूल्यम् : ₹ 700.00

मुद्रक:
**डी.वी. प्रिन्टर्स**
97-यू.बी., जवाहरनगरम्, देहली-110007

# विषयानुक्रमणिका


| विषयाः | पृ.सं. |
|---|---|
| प्ररोचना | iii |
| **Editorial** | **v** |
| प्रास्ताविकम् | vii |
| 1. जैनदर्शने स्याद्वादमीमांसा<br>–आचार्यवीरसागरो जैनः | 1 |
| 2. अर्हद्दर्शने अनेकान्तस्याद्वादौ<br>–प्रो. कुलदीपकुमारः | 6 |
| 3. वेदान्तदृष्ट्या सत्कार्यवादविचारः<br>–कुलदीपचन्द्रः | 12 |
| 4. न्याय-द्वैतमतयोः प्रामाण्यविमर्शः<br>–अनुराग जि रायचूर् | 17 |
| 5. शाङ्करदर्शने आभासवादः<br>–मानसकुमारबेहेरा | 22 |
| 6. न्यायनये कारणतावादविमर्शः<br>–शान्तनुदासः | 27 |
| 7. न्यायनये सिद्धान्तवादविमर्शः<br>–दीपकमण्डलः | 32 |
| 8. शक्तिवादः –कृतिसिंघलः | 39 |

# अर्हद्दर्शने अनेकान्तस्याद्वादौ

-प्रो. कुलदीपकुमारः*

**भवबीजाङ्कुरजनना रागाद्या क्षयमुपगताः यस्य।**
**ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै।।[1]**

भूमिका-

भारतीयवाङ्मये जैनदर्शनम् एकं प्राचीनदर्शनं विद्यते। अस्य दर्शनस्य अनेकानि पुरातनानि नामानि राजन्ते। यथा अर्हद्दर्शनं, निर्ग्रन्थदर्शनम्, अहिंसादर्शनं, स्याद्वाददर्शनम्, अनेकान्तदर्शनं चेत्यादीनि।

येन प्रकारेण विभिन्नदर्शनानां प्रवर्तकाः ऋषिमहर्षय अभवन्, तेन प्रकारेण जैनदर्शनस्य प्रवर्तकः कोऽपि व्यक्तिविशेषः नास्ति। जैनशब्दः 'जिन' शब्दात् निष्पन्नोऽस्ति। जिनशब्दश्च संस्कृतभाषायाः 'जि' धातो 'नक्' प्रत्यये सति निष्पन्नः। जिनशब्दस्यार्थो वर्तते यो जनः **'अनेकभवगहन-विषयव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः।'**[2]

एतादृशैः जिनैः उपदिष्टदर्शनं जैनदर्शनमिति उच्यते। प्रत्येकं युगे चतुर्विंशतितीर्थङ्कराः भवन्ति, तथा ते अनादिकालात् प्रचलत् धर्मदर्शनञ्च प्रतिपादयन्ति। वर्तमानयुगे ऋषभदेवादारभ्य महावीरपर्यन्तं चतुर्विंशतितीर्थङ्करैः जैनधर्मदर्शनयोः सिद्धान्तः प्रतिपादितः।

तदन्तरम् अनेके जैनदर्शनमर्मज्ञा आचार्या अभवन्। तेषाम् आचार्याणां न केवलं जैनदर्शने अपितु सम्पूर्णभारतीयवाङ्मये महत्त्वपूर्णं स्थानं विद्यते।

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली- 110016

1. हेमचन्द्रसूरिः, स्याद्वादमञ्जरी, प्रस्तावना, पृष्ठम्- 71
2. आचार्यामृतचन्द्रः, पञ्चास्तिकायतात्पर्यवृत्तिः, 1/4/18